# संस्कृतवार्ताः
## 09/10/2023
## सायं : 06:20

<u>मुख्यवार्ता</u>

- निर्वाचनायोगेन पञ्च-राज्येषु विधानसभा निर्वाचनानाम् घोषणा कृता मिजोरमे, छत्तीसगढे, मध्यप्रदेशे, राजस्थाने तेलंगानायां च विधानसभा निर्वाचनानि आगामि-मासस्य सप्तमी-त: त्रिंशीं यावत् कारयिष्यन्ते।
- प्रधानमन्त्रिण: श्रीनरेन्द्र-मोदिन: तंजानिया-देशस्य च राष्ट्रपति-पदासीनाया: सामिया-सुलुहू- हसन-वर्याया: मध्ये अद्य नवदिल्ल्यां व्यापक-विषयेषु द्वि-पक्षीयं सम्भाषणं संजातम्।
- रक्षामन्त्री राजनाथसिंह: अद्यारभ्य इटली-फ्रांस-देशयो: चतुर्दिवसीय-यात्रायै प्रतिष्ठते।
- इज़राइल-हमास संघर्षे मृतकानां संख्या एकादश शतSतोप्यधिका जाता इति सूक्ष्यते।

<u>पञ्चराज्येषु विधानसभानिर्वाचनानां घोषणा (एचएल-1)</u>

निर्वाचनायोगेन पञ्च-राज्येषु विधानसभा निर्वाचनानाम् घोषणा कृता मिजोरमे, छत्तीसगढे, मध्यप्रदेशे, राजस्थाने तेलंगानायां च विधानसभा निर्वाचनानि आगामि-मासस्य सप्तमी-त: त्रिंशीं यावत् कारयिष्यन्ते, अथ चैतेषु पञ्च-राज्येषु मतगणना दिसम्बर-तृतीयायां विधास्यते। भारतीय निर्वाचनायोगेन पञ्च-राज्येषु विधानसभा निर्वाचनानां कार्यक्रमस्य घोषणा विहितास्ति। मिजोरमे नवम्बर-सप्तम्यां एकस्मिन्नेव चरणे मतदानम् आयोक्ष्यते, एतदर्थम् अधिसूचना अस्य मासस्य त्रयोदश्यां तिथौ प्रख्यापयिष्यते। छत्तीसगढे प्रथम-चरणस्य मतदानं नवम्बर-सप्तम्यां, द्वितीय-चरणस्य च नवम्बर सप्तदश्यां भविष्यति। प्रथम चरणस्य कृते अधिसूचना अस्य मासस्य त्रयोदश्यां तिथौ, द्वितीय-चरणस्य च कृते एकविंश्यां तिथौ प्रख्यापयिष्यते। अपरत्र च मध्य-प्रदेशे नवम्बर -सप्तदश्यां, आयोक्ष्यमाणस्य मतदानस्य कृते अधिसूचना अक्टूबर-एकविंश्यां तिथौ प्रख्यापयिष्यते, तत्रैव राजस्थाने नवम्बर-

त्रयोविंश्यां आयोक्ष्यमाणस्य मतदानस्य कृते अधिसूचना अक्टूबर त्रिंश्यां प्रख्यापयिष्यते। तेलंगानायां नवम्बर-त्रिंश्यां एकस्मिन्नेव चरणे मतदानं भविष्यति। राज्ये निर्वाचनस्य अधिसूचना नवम्बर-तृतीयायां प्रख्यापयिष्यते। नव-दिल्ल्यां मुख्य-निर्वाचनायुक्त: राजीव कुमार: प्रत्यपादयत् यत् एतेषु पञ्च-राज्येषु विधानसभा निर्वाचनानां विशेष-महत्त्वम् एतदर्थमप्यस्ति यतोहि एतद्धि आगामि-वर्षस्य साधारण निर्वाचनात् पूर्वम् आयोक्ष्य-माणं अन्तिम-विधानसभा-निर्वाचनं भविष्यति। अमुना आश्वासितं यत् निर्वाचनायोग: एतेषु पञ्च राज्येषु निष्पक्षं स्वतन्त्रं च निर्वाचनं सुनिश्चितं करिष्यति। अमुना भाणितं यत् निर्वाचनायोगेन स्वस्थ-त्रुटिमुक्त-समावेशि-मतदातृ-सूची निर्माणे विशेष-रूपेण बलं प्रदत्तम् अस्ति। एतेषु पञ्च राज्येषु आहत्य एकोनाशीत्युत्तर-षट्-शत-मितानि विधानसभा-आसनानि सन्ति। अथ च षोडश -सहस्र-कोटिका: मतदातार: वर्तन्ते। एतस्मिन् निर्वाचने प्राय: षष्टि लक्षाधिका: मतदातार: ऐदम् प्राथम्येन स्वीय-मताधिकारस्य प्रयोगं करिष्यन्ति। निर्वाचनायोगेन सर्वेषाम् अपि पञ्च राज्याणां यात्रा-विधान-पूर्वकं मुख्य-निर्वाचनाधिकारिभि: सह जनपदानां राज्याणां च प्रशासनै: साकं, केन्द्रस्य राज्याणां च प्रवर्तनाभिकरणै: समं च विस्तार-पूर्वकं समीक्षापि विहिता। एतेषु राज्येषु चतुस्त्रिंशदुत्तर-सप्त-शताधिक-सप्तदश सहस्र-मितानि आदर्श-मतदान-केन्द्राणि रचयिष्यन्ते। एक-विंशत्युत्तर-षट्-शत-मितानां मतदान केन्द्राणां कार्यजातं शारीरिक-रूपेण अक्षमा: दिव्यांग-जना: सम्भालयिष्यन्ति। सर्वेषु मतदान केन्द्रेषु न्यूनतम-सुविधानाम् अवश्यमेव उपपादानस्य आश्वासनं प्रदत्तम् अस्ति। मुख्य-निर्वाचनायुक्त: प्रावोचत् यत् मध्यप्रदेशे आरक्षित-वन-क्षेत्रेषु अभयारण्येषु जनजातीय-मतदातृ-जनेभ्यः मतदान-केन्द्राणि रचयिष्यन्ते। एतदपि प्रोक्तमस्ति यत् सी-विजिल ऐप इत्यस्य तंत्रांशस्यं माध्यमेन कश्चिदपि नागरिक: निर्वाचन-सम्बद्ध-समस्याया: सूचनां निर्वाचनायोगाय दातुं शक्नोति। प्रत्येकमपि सूचनायां शत-निमेषान्तरे कार्यान्वयनं करिष्यते। पञ्च-राज्येषु सीमा-पार-त: रूप्यकाणां, मदिराया:, नि: शुल्क-वितरणीय-सामग्रीणां मद्य-पदार्थानां च नायानानयनस्य अवरोधनार्थं चत्वारिंशदधिक नव-शत-मिततोऽपि अधिकानि अन्ता-राज्यीय निरीक्षण-केन्द्राणि अपि निर्मास्यन्ते। मुख्य-निर्वाचनायुकतेन प्रतिपादितं यत् पञ्च-राज्येषु कदाचार-मुक्त-

निर्वाचनानाम् आयोजनार्थम् अवैध सामग्रीणाम् अधिग्रहणस्य प्रबन्धनस्य प्रणाली अपि प्रारभ्यते।

<u>प्रधानमन्त्री - तंजानिया (एचएल-2)</u>

**प्रधानमन्त्रिण: श्रीनरेन्द्र-मोदिन: तंजानिया-देशस्य च राष्ट्रपति-पदासीनाया: सामिया-सुलुहु- हसन-वर्याया: मध्ये अद्य नवदिल्ल्यां व्यापक-विषयेषु द्वि-पक्षीयं सम्भाषणं संजातम्। द्वै-पाक्षिके उपवेशनेऽस्मिन् उभावपि नेतारौ द्वै-पाक्षिकै: संबंधैः संयुतानां विभिन्न-पक्षाणां समीक्षां कृतवन्तौ। सममेव उभयोः देशयोर्मध्ये सामीप्यार्थम्-ऐतिहासिक-संबंधान् अग्रे सारयितुं च विभिन्नासु नीतिषु च चर्चां विहितवन्तौ। उभयोः देशयोर्मध्ये प्रतिनिधि-मंडल-स्तरेपि वार्ता संजाता। अस्मिन्नवधौ द्वै-पाक्षिक-सहयोगस्य विभिन्न-क्षेत्रेषु अपि चर्चा जाता। यस्यां चर्चायां व्यापार-निवेशौ रक्षा, सामुद्रिक-सुरक्षा, विकास-संबद्ध-सहयोग:, उच्च-शिक्षायां सहायता, उभयोः देशयोः नागरिकाणां मध्ये दृढ संबन्धाः च सम्मिलिताः सन्ति। वार्तानन्तरं तंजानिया देशस्य राष्ट्रपतिना साकं संयुक्त वार्ताहर-सम्मेलनं संबोधयता प्रधानमन्त्रिणा श्रीनरेन्द्र-मोदिना उक्तं यत् संप्रति भारत-तंजानिया देशयोः संबन्धानाम् ऐतिहासिकं पलं वर्तते। तस्य कारणं अस्ति यत् उभयोः देशयोर्मध्ये प्रचलिता सुदीर्घा पुरातनी मित्रता संप्रति सामरिक-सहयोग-स्तरे प्राप्ता अस्ति। तेनोक्तं यत् अफ्रीकायां तंजानिया देश: विकासस्य विषये भारतस्य सर्वाधिक: समीपवर्ती सहयोगी अस्ति। प्रधानमन्त्रिणा उक्तं यत् भारत-तंजानिया-देशौ व्यापार-निवेश-क्षेत्रे महत्वपूर्ण-सहयोगिनौ स्तः। अपि च उभावपि देशौ उभयोः पक्षयोः स्थानीय-मुद्रासु व्यापार-वाणिज्यं संवर्धयितुं विविधासु नीतिषु कार्यं कुर्वन्तौ स्तः। श्री मोदिना उक्तं यत् भारत-तंजानिया-देशौ रक्षा-क्षेत्रे सहयोगस्य कृते पञ्च वर्षाणां कार्यनीत्यां साहमत्यं प्रकटितवन्तौ। अनेन माध्यमेन सैन्य-प्रशिक्षणे, सामुद्रिक-सहयोगे, क्षमता-संवर्धने, रक्षा-संबंद्धेषु उद्योग-क्षेत्रेषु च सहयोगानां नूतनायामाः संमिलिताः भविष्यन्ति। सः प्रसन्नताम् अभिव्यक्तवान् यत् तंजानिया-देशेन जी-विंशतिः शिखर-सम्मेलनावधौ भारतेन समारब्धे वैश्विक जैवेन्धन-संघटने सम्मेलनस्य निर्णयः स्वीकृतः। श्री-मोदिना प्रोदीरितं यत् अन्ताराष्ट्रिय बिग-कैट-संघटने सम्मेलितुं तंजानिया-देशस्य निर्णयः बृहत्-स्तरे वन्य-**

प्राणिनां संरक्षणाय चाल्यमाणान् वैश्विक-प्रयासान् सुदृढ-करिष्यति। उपवेशनानन्तरं उभयोः देशयोर्मध्ये विभिन्न-क्षेत्रेषु कार्यनैतिकं विनिमयमपि जातम्। राष्ट्रपतिपदासीना द्रौपदी मुर्मुः इत्यस्या: निमन्त्रणे तंजानिया देशस्य राष्ट्रपतिः भारतस्य चतुर्दिनात्मिकायां राजकीय यात्रायां ह्यः नव दिल्लीं प्राप्तवती आसीत्। इत: पूर्वं राष्ट्रपति-भवनस्य प्राङ्गणे हसन-वर्यायाः पारंपरिक स्वागतं जातं तदनन्तरं ते राजघट्टे महात्म-गान्धिने पुष्पांजलिं समर्पितवत्यौ। राष्ट्रपति भवने स्वागतानान्तरं तंजानिया-देशस्य राष्ट्रपति: भारतेन साकं दशकं यावत् सुदृढ-संबन्धानां प्रशंसामकरोत्। तंजानिया-देशे राष्ट्रपतिपद-ग्रहणानन्तरम् तस्याः प्रथमं भारत-यात्रा अस्ति। तंजानिया-देशस्य राष्ट्रपतेः भारतस्येदं यात्रा अष्टवर्षस्यानन्तरं जायते। तंजानियायाः राष्ट्रपतिः श्वः नव-दिल्ल्यामायोज्यमाने व्यापार-निवेशयोर्मंचस्य एकस्मिन् विशिष्टे उपवेशने अपि भागं भजिष्यति।

<u>रक्षामन्त्रिण: इटली-फ्रांस-यात्रा (एचएल-3)</u>

रक्षा-मन्त्री राजनाथ-सिंह: अद्य प्रभृति चतुर्दिवसीय-यात्रा-प्रसङ्गे इटली-देशं फ्रांस-देशं च प्रतिष्ठते। निज-देश-द्वयस्य यात्राया: प्रथमे चरणे रक्षा-मन्त्री रोम-नगर्यां इटली-देशस्य रक्षा-मन्त्रिणा गुइडो क्रिसेटो इत्यमुना साकं सम्भाषणम् आचरिष्यति। ऐषमो मार्च-मासे इटली-देशस्य प्रधानमन्त्रिण: भारत-यात्राया: अवसरे उभयो: देशयो: सम्बन्धा: सामरिक-साहमत्यस्य शिखर-सानौ सम्प्राप्ता: आसन्। यात्राया: द्वितीये अन्तिमे च चरणे श्री-राजनाथ सिंह: पेरिस-नगरे सशस्त्र-सैन्य-बलस्य रक्षामन्त्रिणा सेबेस्टियन लेकोर्नू इत्यमुना साकं पञ्चमं वार्षिकं रक्षा सम्भाषणम् आचरिष्यति। भारत-फ्रांस-देशाभ्यां सद्यः पूर्वमेव सामरिक-साहमत्यस्य पञ्चविंशतिः वर्षे पूर्त्यवसरे उत्सव: आमानित: आसीत्। ध्येयमस्ति यत् उभयो: देशयो: मध्ये महत्त्वपूर्णम् औद्योगिक-सहयोगं समेत्य गम्भीरा: विस्तृता: च द्वै-पाक्षिका: रक्षा सम्बन्धा: सन्ति। रोम-नगरे पेरिस-नगरे च उभयत्रापि रक्षा मन्त्री औद्योगिक-सहयोगार्थं सम्भावितेषु अवसरेषु चर्चा-विधनार्थमपि रक्षा-उद्योगस्य मुख्यकार्यकार्यधिकारिभि: वरिष्ठ-प्रतिनिधिभिश्च साकं विचार विमर्शं करिष्यति।

**इज़राइल-हमास-संघर्षः (एचएल-4)**

इजराइलस्य हमासातंकि-समूहस्य च मध्ये प्रवर्तमाने संघर्षे मृतकानां संख्या एकादश शतSतोप्यधिका जाता अस्ति। प्रायः सप्त-शत-मिताः इजराइल-देशीयाः जनाः मृतिं गताः सन्ति चेत् चतुश्शतमिताः जनाः गाजा-पट्टिकायां पञ्चतां प्रापिताः सन्ति । अस्मिन् संघर्षे पारेसहस्रं जनाः व्रणिताः सन्ति इति आशंक्यन्ते। कतिपय-क्षेत्रेषु हमास-आतङ्किनाम् आक्रमणस्य अनन्तरं ध्वंसावशेषस्य अपाकरणमपि नैव जातम् अस्ति चेत् क्वचित् क्वचित् युद्धं प्रचलदेव वर्तते। अनेन कारणेनापि मृतकानां संख्या अतोSपि समेधितुं शक्नोति। विभिन्नेषु क्षेत्रेषु हमासातंकिनां इजराइल-देशीय-सुरक्षाबल-भटानां च मध्ये भयङ्करं युद्धं जायतेतराम्। इजराइल-सैन्य-बलेन सबलं प्रतिपाद्यते यत् अमुना अधुना यावत् गाजा-पट्टिकायाम् अष्ट-शताधिकेषु हमासस्य केन्द्रेषु आक्रमणं कृतम् अस्ति। एतेषु केन्द्रेषु पूर्वोत तरस्य बेत हेनॉन इत्याख्ये नगरे विहितं वायवीयम् आक्रमणम् अपि समाविष्टं वर्तते। अत्रान्तरे संयुक्त-राष्ट्र-मञ्चेन प्रोच्यते यत् गाजा-पट्टिकायां न्यूनान्न्यूनाः सप्तति-सहस्र-मिताः फिलिस्तीन-जनाः विद्यालयेषु शरणापन्नाः सन्ति । संयुक्त-राष्ट्र-मञ्चेन गाजा-पट्टिकायां खाद्य-सामग्रीणाम् उपपादनार्थं मानवीय-वीथिका-निर्माणस्य अध्यर्थना विहिता अस्ति। संयुक्त-राष्ट्र-मञ्चे इजरायलस्य राजदूतेन ह्यः फिलिस्तीनस्य इस्लामिकातङ्कि-समूहे हमासे युद्धापराधस्य आरोपाः आरोपिताः, अमुना सङ्कल्पः कृतः यत् सम्प्रति "हमासस्य आतंकि-संरचनायाः धूलिसात् करणस्य" समयः आगतः अस्ति। न्यूयॉर्क-नगरे पञ्चदश-सदस्यीय-सुरक्षा परिषदः पिहिते कक्षे समनुष्ठितस्य उपवेशनस्य पूर्वं इजरायल-देशीयः संयुक्त-राष्ट्र-मञ्चस्य राजदूतः गिलाद-एर्दानः अब्रवीत् यत्, एषः युद्धापराधः अस्ति, स्पष्ट-रूपेण प्रलेखितः युद्धापराधः वर्तते। एर्दानः अन्ताराष्ट्रिय-समुदायम् अध्यर्थितवान् यत् ते इजरायल-देशस्य पूर्णतया समर्थनं कुर्युः, हमासस्य आतङ्काक्रमणस्य च निन्दां कुर्युः।

**प्रधानमन्त्री- एथलीटक्रीडकदलमेलनम्**

प्रधानमन्त्री श्रीनरेन्द्र-मोदी श्वः अक्टूबर दशम्यां सायं प्रायः सार्ध-चतुर्वादने मेजर ध्यानचंद स्टेडियम इति क्रीडा-प्राङ्गणे, नव दिल्ल्यां एशिया-महाद्वीपीय-क्रीडा-महाकुम्भे प्रतिभागिता-कर्तृकस्य भारतीय, एथलीट-क्रीडक-दलस्य साकं क्रीडकैः सम्भाषणम् आचरिष्यति। तान् सम्बोधयिष्यति च। एषः कार्यक्रमः प्रधानमन्त्रिणा विहितः गत-वर्षीये एशिया-महाद्वीपीय-क्रीडा-महाकुम्भे एथलीट-क्रीडकानाम् उत्कृष्टोपलब्ध्यर्थं तेभ्यः वर्धापन-प्रदानार्थं भविष्यत्-काले आयोक्ष्यमाणाभ्यः प्रतियोगिताभ्यश्च उत्तम-क्रीडार्थम् अभिप्रेरणस्य च एकः प्रयासः अस्ति। भारतेन एशिया-महाद्वीपीय-क्रीडा-महाकुम्भे अष्टाविंशतिः स्वर्ण-पदकैः सहितानि आहत्य सप्तोत्त-रैक-शतं पदकानि आसन् विजितानि। कार्यक्रमे एशिया-महाद्वीपीय-क्रीडा-महाकुम्भस्य कृते भारतीय-दलस्य एथलीट क्रीडकाः, तेषां प्रशिक्षकाः, भारतीय ओलंपिक संघस्य अधिकारिणः, राष्ट्रिय-खेल-महासंघानां प्रतिनिधियः युवा-कार्यक्रम-खेल-मंत्रालयस्य च अधिकारिणः अपि भागं भजिष्यन्ति।

इति वार्ताः